१५ तुर्या-ऽष्टम-नवम-चतुर्दश-पञ्चदशदिवसानां सामान्यसामान्यपर्वत्वम् ३३
१६ एष्वेव भग्रहादेर्विशेषस्य भावात् पर्वणः सामान्यविशेषत्वं तस्य एकादशमासेषु उपलब्धिः ३४–३५
१७ अत्रैव एकादशधात्वप्रदर्शने षष्ठ्ये-कादशी-द्वादशी-त्रयोदशीतितिथिचतुष्टयस्य विशेषत्वं शिष्टस्य सामान्यविशेषत्वम् तत्र कन्यान्त्यजादीनामनुयागचक्रे पूज्यत्वविधानम् ३६–३९
१८ पर्वसु आदियागापेक्षया पूजाकर्मणि अनुयागस्यैव मुख्यतया अनुष्ठेयत्वम् ४०–४१
१९ आश्वयुजमासस्य भग्रहादियोगाभावे विशेषविशेषरूपत्वम् ४२
२० फाल्गुनशुक्लद्वादश्या अपि त्रयोदशीवेधे विशेषविशेषपर्वत्वम् ४३
२१ त्रिविभक्तस्य पर्वदिनस्य पुनरपि त्रिधा विभागे मुख्यतम-पूजाकालस्य विशेषविशेषत्वं यत्र पूजयैव काम्यसंपत्तिः ४४–४६
२२ अत्रैव पूजाकालमतिक्रम्य तिथ्यादिसद्भावे वेलाया एव विशेषत्वं न तिथेरिति केषांचन मतम् ४७
२३ ग्रंन्थकृतः गुर्वाम्नाये भग्रहादिभिर्विशेषत्वापादनात् तिथेरेव मुख्यतया पूज्यत्वं न वेलायाः ४८–५०

२४ अत्रार्थे श्रीत्रिकभैरवकुलशास्त्रादीनां प्रामाण्यात् पर्वदिवसेषु वेलायोगाऽनभिधानम् ५१
२५ मीमांसोक्तन्यायाश्रयेण विशेषत्वाभावेऽपि तिथेरेव मुख्यतया पूज्यत्वं तेन च पर्वणां विशेषसामान्यताभिधानम् ५२
२६ श्रीत्रिककुलादावनुक्तस्य ऊर्मिप्रभृतिषूक्तस्य वेलायोगस्य फाल्गुनाषाढपर्यन्तं पञ्चसु अभीष्टसिद्ध्या श्रावणान्मार्गशीर्षान्तं च पञ्चसु मैत्र्यादिसिद्ध्या सङ्गतिप्रतिपादनम् ५३–५५
२७ तिथौ भग्रहाद्यभावेऽपि वेलायोगस्य तत्स्वभावोदयकारकत्वम् ५६
२८ षडंशयोगिनि दिने विशेषतमपूजाविधानम् ५७
२९ पर्वयागस्य न केवलं काम्याधिकारेणाभिधानमपितु नैमित्तिकाधिकारेणापि इत्यत्र भैरवकुलोर्मिशास्त्रयोः प्रामाण्यम् ५८–५९
३० तत्र अनुयागसिद्ध्यर्थं चक्रयागनिरूपणम् ६०
३१ श्रीयोगीश्वरमतप्रामाण्याद् अस्य मूर्तियागपदव्यपदेश्यत्वं मुख्यत्वेन काम्याधिकारत्वञ्च ६१–६२
३२ अत्रैव त्रैशिरसादिप्रामाण्यात् ज्ञानियोगियोजनद्वारा पूर्णतासादनम् ६३–६४
३३ दीक्षोत्तरसंवादादपि चक्रयागे ज्ञानिनो दैशिकस्य आत्मशिवयोः भोक्तृतया तत्त्वजगतः भोग्यतया अनुसंधानाद् अचिरेण मुक्तिः ६५–७१
३४ श्रीमन्निशाटनप्रामाण्यादपि ज्ञानिनोऽगण्यपातकित्वं सर्वोत्कृष्टत्वं तत्क्षणमुक्तत्वञ्च ७२–७४
३५ अतएव श्रीयोगीश्वरमतप्रामाण्यात् ज्ञान्याश्रयेण मूर्तियागाचरणीयत्वं चक्रार्चनासूत्रणञ्च ७५
३६ मूर्तियागानुष्ठानकालनिर्णयः ७६-७८
३७ केवल-यामल-मिश्र-चक्रि-वीरसङ्करभेदैः मूर्तियागस्य पञ्चधात्वनिरूपणम् ७९-८१
३८ अत्रैव आवृत्तिक्रमे पङ्क्तिक्रमे वा गुरोः मध्य एवोपवेशनम् ८२–८३
३९ ततः चक्रानुसारेण तत्तद्गुरुसाधकादिरूपचक्रार्चनविधानम् ८४
४० तत्र एकाराद्यष्टकाष्टकान्तचक्रनिरूपणम् ८५–८६
४१ तत आधारतया पात्रस्य तर्पणम् ८७
४२ पूर्णभ्रमणरूपपात्रतर्पणविधिनिरूपणम् ८८–९०
४३ अत्र तर्पणे स्वगुरुक्रमोक्तक्रमानुसारेण तदग्रपात्रे अवदंशविकिरणविधानम् ९१–९२
४४ पात्राभावे वेल्लिताशक्तेः पात्रीकरणोपदेशः ९३
४५ तत्र सिद्धामतोक्तविधिप्रदर्शनम् ९४–९८
४६ एवं यागान्ते दक्षिणादानस्य तन्मालायाश्चोपदेशः ९९–१००

४७ मूर्तियागस्य सर्वप्रधानत्वम्, काम्यविधौ तु तस्य सप्तकृत्वः-
करणोपदेशः १०१
४८ सप्तकृत्वःकरणे देवीवरप्रदत्वादिप्रयोजननिरूपणम् १०२–१०३
४९ देवताशब्दार्थे वीराणां तच्छक्त्यादीनामन्तर्भावः १०४
५० देवीनामभावे कुमारीपूजनोपदेशः १०५
५१ अर्कादिशुक्रान्तग्रहपञ्चकमध्यादेकतमेन युक्तस्य प्रतिपदादितिथि-
श्रवणादिनक्षत्रोपलक्षितस्य एकादशाहर्गणस्य योगपर्वत्वम् १०६–१०९
५२ योगपर्वणि मूर्तियागस्य अवश्यंकरणीयतयोपदेशात् तेन ज्ञानिनो
मण्डलं विनाऽपि समयित्वलाभे श्रीसिद्धयोगीश्वरमतप्रामाण्यम् ११०–१११
५३ ततः श्रीरत्नमालाद्यनेकशास्त्रसंसूचितपवित्रकविधि-
निरूपणोपक्रमे प्राधान्येन श्रीमन्मालोक्तविधिनिरूपणप्रतिज्ञा ११२–११३
५४ तदनुसारिपवित्रारोहणमाहात्म्यस्य कुलवेदिभिः तस्यावश्यं-
कार्यत्वस्य च निरूपणम् ११४–१२०
५५ तुलपूर्णिमायां तुलाख्ये कार्तिकस्य अन्त्ये दिवसे च
पवित्रकविधेरनुष्ठानोपदेशः १२१–१२२
५६ पाठभेदात् कुलशब्दस्य कार्तिककृष्णान्त्यदिवसाभिधेयत्वं
नित्यातन्त्रविदामत्र मतान्तरम् १२३
५७ मतान्तरे कुलशब्दवाच्यस्य दक्षिणायनस्य पूर्णत्वगमनात्
कुलपूर्णिमायाः माघशुक्लान्त्यदिवसत्वम् १२४–१२६
५८ रत्नमालाकुलागमप्रामाण्यात् पवित्रकविधेः दक्षिणायन-
साजात्यात् सर्वथा शुक्लपक्षानुष्ठेयत्वाभिधानम् १२७–१२९
५९ अत्रत्यपवित्रकविधिनिरूपणे गुर्वादिवशात् तत्त्वादिवशाच्च
गुण-ग्रन्थिसंख्यानिर्णयः १३०–१३७
६० ततः समस्ताध्वपरिपूर्णत्वभावनात् गुरुपूजापुरस्सरं
यथाविभवविस्तरं निर्दिष्टकालान्तराले पवित्रक-
विध्यनुष्ठानोपदेशः १३८–१४२
६१ सर्वथैव अस्य कर्तव्यत्वम् १४३
६२ नित्यपूजापरिपूर्णत्वस्य पवित्रकपूजने नैमित्त्यम् १४४
६३ पवित्रकलोपे प्रायश्चित्तानन्तरं पुनःकर्तव्यताविधानम् १४५
६४ श्रीत्रिशिरोभैरवोक्तपवित्रकविधेः शैव-तंत्र-षट्स्रोतः-
प्रक्रियया निरूपणोपक्रमः १४६-१४७
६५ तत्र पापादिप्रशमनार्थं समयभ्रष्टादीनाम् अधिकारित्वम् १४८–१४९
६६ श्रावणादौ कार्तिकान्ते च शुक्लपक्षकर्तव्यताविधानं
कृष्णपक्षकर्तव्यतानिषेधः १५०

६७ अत्र पवित्रकस्वरूपाभिधाने ग्रन्थिपरिमाणस्य तन्तुविन्यासाधीनत्वम्, व्यक्तादिभेदात् स्थानभेदवत्त्वम् १५१–१५७
६८ विद्यापीठादिभेदाद् ग्रन्थिभेदनिरूपणम् १५८–१६१
६९ पवित्रककरणानन्तरं मन्त्रपूजनादि-पूर्णाहुतिक्षेपान्ताया इतिकर्तव्यतायाः निरूपणम् १६२–१७४
७० ततः मूलमन्त्रपूरणार्थं प्रभुस्तुतिः १७५–१७६
७१ भौतिक-नैष्ठिकभेदात् पवित्रकचतुष्टयस्य अनुलोम-विलोमाभ्याम् अर्पणम् १७७–१७८
७२ अन्येतिकर्तव्यतानन्तरं ततोऽन्यत्रगमननिषेधः १७९–१८१
७३ ततो दैशिकपूजनम् १८२
७४ दैशिकस्य विधिपूरणार्थमाशीर्वादः १८३
७५ ततः देवविसर्जनादिपूर्वकं गुरुणा अगाधाम्बुनि शेषप्रक्षेपणस्योपदेशः स्थिरप्रतिष्ठानिषेधश्च १८४–१८५
७६ कुलपर्वादौ पूर्वासूत्रितस्य देवार्चनाधिक्यपूर्वकं नैमित्तिकविधेः चक्रयागविधेश्च अनुवादः १८६–१८७
७७ तत्र उपायानां तदुपायानाञ्च पूजनविधानम् १८८–१८९
७८ निर्विलम्बमुपेयमयतापत्तेरेव उपायपूजायां तत्र विशेषानुष्ठाने च नैमित्त्यम् १९०–१९१
७९ अत आत्मोपलब्धिदिनस्यैव मुख्यं नैमित्तिकदिनत्वम् १९२
८० शास्त्रगुर्वादीनाम् आत्मज्ञानोपायत्वम् १९३
८१ गुरुपत्नीपुत्रादिषु मातृभ्रात्रादिव्यवहारे विद्यासंबंधस्य प्रवृत्तिनैमित्त्यम् १९४
८२ देहत्यागेऽपि पुत्रपौत्राधिकारस्य बोधोपकार-सन्तानावधिकत्वम् १९५–१९७
८३ देहस्य नश्वरत्वम् आत्मनोऽविनश्वरत्वम् १९८
८४ स्वातन्त्र्यात् छन्नस्यापि आत्मनः प्रकटीभावे ज्ञानसंतानस्यैव समुचितोपायत्वम् १९९–२००
८५ सदृशज्ञानधारया ज्ञानसन्तानस्य शीघ्रं प्राप्यलाभः २०१
८६ संसारोचितविज्ञानसंततिध्वंसाद् असंसारोचितविज्ञान-सन्तानेन लोकोत्तरज्ञानलाभः २०२
८७ अत्र आत्मगतगुरुविज्ञानस्य मुख्यं कारणत्वम् २०३
८८ देहभेदेऽपि तत्रार्पणवशाद् गुरुविज्ञानस्यैव उपादानत्वम् २०४
८९ विज्ञानसन्तानस्य देह-सन्ततिगयोर्भेदयोः योगीच्छाविष्ट-शावशरीरवद् अप्रयोजकत्वम् २०५–२०६
९० यौनसन्ततेर्गुणभावेन गुरुसन्ततेरेव प्राधान्यं तद्वैचित्र्यञ्च २०७–२०८
९१ गुरोरत्र कारणत्वं तत्पत्न्याश्च सहकारित्वम् २०९

९२ क्वचिद् बाह्यसहकारिणोऽभावेऽपि गुरुभ्रात्रादिसंभवः २१०–२११
९३ तत्परम्परायोगे गुरुवर्गतयाभिधानम्, अस्यैव मुख्य-
सन्तानतया पूजनम् २१२
९४ गुर्वादेः जन्म-दीक्षा-मृतिदिवसत्रयस्य विज्ञानोपायदेहादि-
कारणत्वात् मुख्यं नैमित्तिकदिनत्वम् २१३–२१६
९५ प्रसङ्गात् मरणस्वरूपाभिधाने शिवस्य स्वरूपसङ्कोचाद्
गर्भस्थदेहगतप्राणनोदयद्वारा शरीरग्रहणम् २१७–२१८
९६ गर्भस्थदेहनिर्माणेऽपि प्राणनोदयस्यैव ईश्वरता २१९
९७ गृहीतसङ्कोचस्य देहस्थस्य शिवस्य
संपुष्टदेहप्राणबलस्य कर्मभोगभोगित्वम् २२०–२२३
९८ अत्रार्थे गृहिदृष्टान्तेन स्फुरणमात्रस्य निष्कलतया इन्द्रियादियुजस्तु
सकलतया अभिधाने श्रीगह्वरप्रामाण्यम् २२४–२२६
९९ कर्मक्षये प्राणयन्त्रविघटनात् प्राक्संस्थानोपमर्दन-
रूपस्य देहयन्त्रविघटनस्य मरणसंज्ञित्वम् २२७–२२९
१०० देहयन्त्रविघटनेऽपि देहान्तरे प्राणनोदयात् प्राग्वदेव जन्ममृत्यू २३०–२३१
१०१ अस्य सृष्ट्यादेः कर्मबलोपनतत्वे नियत्यादिवैचित्र्यभागित्वम् २३२
१०२ अनुग्रहस्य तु कर्मादिनैरपेक्ष्यम् २३३
१०३ अनुग्रहस्य कर्मादिहेतुत्वे परस्परपरिहाररूपदोषः २३४
१०४ अनुग्रहस्य प्रागुक्तक्रमिकतीव्रादिभेदानामनुस्मरणम् २३५
१०५ दीक्षानुग्रहाद् देहान्ते शिवीभावात् पुनर्जन्माऽभावः २३६
१०६ स्वयंभ्वादीनां गृहे मृतानां दीक्षया अपुनर्भूत्वं शिवत्वप्राप्तिश्च २३७–२३८
१०७ स्वयंभूनाम् अनुग्रहैकतत्पर-स्वकृत्यांशस्थितभेदाद् द्वैविध्यम् २३९–२४०
१०८ प्राक्तनानां मर्त्यावतार विनैव, पश्चात्तनानां तु स्वकृत्यांशस्थित्या
मर्त्यावतारानन्तरं दीक्षा-ज्ञान-चर्यादिक्रमेण,
शिवात्मतालाभः २४१–२४६
१०९ एवम् उभयत्र मृतानां स्थावरादीनां तद्वत् पुंसां च
अविवेकात् सालोक्यम् २४७–२४८
११० उभयोरविवेके तमोरजःकृतो भेदः, स्थावराणाञ्च
क्रमेण रुद्रतापत्तिः २४९
१११ अतएव सर्वज्ञानादिप्रामाण्यात् तत्त्वविदाऽतत्त्वविदा च स्थापिते
लिङ्गे क्रमेण स्वयम्भूसदृशक्षेत्रादिरूपत्वं दुष्टविधित्वञ्च २५०–२५३
११२ अतत्त्वविदः सर्वत्रान्यत्वबुद्ध्या मोक्षमोचकत्वयोरभावः २५४
११३ तत्त्ववित्प्रतिष्ठापितलिङ्गस्य आयतनत्वेन आश्रयणीयत्वम् २५५
११४ अत्रार्थे श्रीरत्नमालाप्रामाण्याद् योगिनां योगेन अयोगिनाञ्च
तीर्थायतनसमाश्रयेण कालवञ्चनसिद्धिः २५६–२५८

११५ सिद्धिमुक्तिभेदात् तत्त्वधारणा-क्षेत्रोपयोगविभागः २५९

११६ ज्ञानिनामधिकारस्य वक्ष्यमाणत्वात् तत्तत्त्वदीक्षित-पशूनामत्र अधिकारः वासनानुसारम् ईशसायुज्यं तत्तत्क्षेत्रयोगश्च २६०–२६२

११७ अत्रार्थे श्रीपूर्व-स्वायम्भुवादेः, सिद्धि-मन्त्रवीर्यगामित्वे च शास्त्रान्तरस्य, प्रामाण्यम् २६३

११८ क्षेत्रौचित्यादेषां लोकधर्मिणां रुद्रसायुज्यावाप्तिः २६४

११९ सिद्धान्त-पुराणादिसंवादाद् एषां तुल्येऽपि रुद्रावतारत्वे प्राक्कर्मवासनातः कर्म-भोगगतं वैचित्र्यम् २६५–२६६

१२० भावस्य शक्तिरूपानेकाभाससंमूर्च्छनात्मकत्वात् प्राक्कर्मानुगुणाभासांशस्यैव रुद्रतयोद्रेके उक्तवैचित्र्योपपत्तिः २६७–२६८

१२१ अत्रैव अधिकारिभेदाद् दीक्षोचितस्थानानुसरणप्रतिनियमाभावः इति वैचित्र्यान्तरप्रदर्शनम् २६९–२७२

१२२ पशुमात्रस्य सालोक्यं दीक्षितस्य सामीप्यं दीक्षितत्वेऽपि तत्तत्स्थानादौ मृतस्य सायुज्यम् इति निष्कृष्टार्थः २७३

१२३ ऊर्ध्वशास्त्रगस्य तत्र अनास्थया तीर्थाद्याश्रयणे निष्फलत्वम् २७४

१२४ अत्रार्थे आगमसंवादः २७५

१२५ अयोग्यस्यापि मृतिकाले शिवास्थया पूर्णफलभागित्वम् २७६

१२६ अन्यत्र पुण्यस्थलेषु मृतानां स्वर्गभोगोपभोगित्वम् अधरायतने श्रितास्थानां तिरोहितत्वम् २७७–२७८

१२७ एषामत्र ज्ञानदोषे क्रमात्स्थितिनाशः दीक्षा-ऽऽयतन-ज्ञानदूषितानां चेतसाऽऽचरणे नरकगामित्वम् २७९–२८०

१२८ दीक्षा-ऽऽयतन-ज्ञानेषु अनास्थागतविशेषस्य व्यापारव्याहृतेः परिज्ञानं तेषां च संसार-कैवल्यभागितया द्वैविध्यम् २८१

१२९ स्वास्थ्ये तेषामनुदयः, अस्वास्थ्ये धातुदोषजभोगमात्रत्वम् २८२

१३० स्वास्थ्याऽविशेषेऽपि ज्ञानिनाम्, पातञ्जलसूत्रप्रामाण्यात्, संसारसंस्कारप्रबोधस्य जन्मान्तरीयगाढाभ्यासवशात् धातुदोषजन्यत्वेऽज्ञानिनां तु तथाऽनभ्यासात् तस्य शक्तिपातजन्यत्वेऽविप्रतिपत्तिः २८३–२८६

१३१ अतः ज्ञानिनः संस्कारोदये तिरोधानशक्तेरहेतुकत्वम् २८७–२८८

१३२ देहस्थज्ञानिनो भोगरूपान्यसांसारिकसंस्कारवत्त्वमपि २८९

१३३ नैतावता ज्ञानिनो मोक्षः, मृतेश्च जन्मादिवद् भोगरूपत्वं सुखदुःखात्मकद्वैविध्यञ्च २९०–२९१

१३४ योगिनस्तु मृतौ भावनया तत्तत्त्वगामित्वम् २९२

१३५ अत्रार्थे श्रीस्वच्छन्द-मालिनीशास्त्रप्रामाण्यम् २९३
१३६ योगिनां मरणाख्यभोगाऽभावः परदेहप्रवेशवद् देहत्यागश्च २९४
१३७ मृतिभोगस्य मर्मवेदने-न्द्रियमोह-मनस्तमोमयत्वम् २९५
१३८ योगिनः परदेहे बुद्ध्यादिसञ्चारस्य मनःप्रयत्नाधीनत्वाद् अहन्ताप्ररोहान्नात्र मृतिभोगावकाशः २९६–२९७
१३९ इन्द्रियचक्रस्य मनोऽनुगामित्वे मक्षिकादृष्टान्तः २९८
१४० देहापगमेऽपि योगिन इन्द्रियाणां सूक्ष्मतया अन्तरा अवस्थानम् २९९
१४१ अत्रार्थे परदेहादिसञ्चारिदृष्टान्तः ३००
१४२ लौकिक-दीक्षितभेदेन योगिद्वैविध्ये पूर्वेषां क्रमेण शिवत्वमपरेषां भोगमात्रत्वम् ३०१
१४३ एवं योगिनां दीक्षावैचित्र्यं विचित्रफलप्रदत्वञ्च ३०२
१४४ ज्ञानिनोऽपि कम्प्र-स्वभ्यस्तभेदेन द्वैविध्यम्, तत्र कम्प्रज्ञानिनां देहान्ते प्रस्फुटज्ञानोदयात् शिवत्वासादनम् ३०३–३०५
१४५ विधायकदेहपातस्य ज्ञानस्फुटत्वे हेतुत्वम् ३०६
१४६ स्वभ्यस्तज्ञानिनां तु जीवन्मुक्तत्वात् सर्वदा स्थित्यादिवत् मृतेरप्यप्रासङ्गिकत्वम् ३०७–३०८
१४७ अत्रार्थे श्रीरत्नमाला-शेषकृतस्वशास्त्रसंवादः ३०९
१४८ श्रीरत्नमालावाक्यपाठः ३१०
१४९ अपिना एतद्व्याख्याने ज्ञानिनः जीवनमुक्तताऽभिधानम् ३११
१५० तात्पर्येण अनन्तकारिकावाक्यपाठः ३१२–३१३
१५१ अस्यैव पदशो व्याख्याने देहसंबंधस्य बन्धकत्वाभावेऽपि सति देहे संभावितभेदसंस्काराशङ्कापरिहारार्थं प्रमात्रन्तराणां तथाबोधनार्थं वा देहपातानन्तर्येण कैवल्यगमनाभिधानोपपत्तिः ३१४–३१९
१५२ अत्रार्थे श्रीमत्त्रैशिरसार्थसंवादनात् ज्ञातनिरुपाधिचिदैकघनस्वरूपशिवतत्त्वस्य ज्ञानिनः सर्ववस्तुषु ऐकात्म्येन अवस्थानात् जन्ममरणादिकल्पनानाम् अनवकाशः ३२०–३२३
१५३ अत्रार्थे गीतार्थसंग्रहः ३२४–३२६
१५४ अत्र अज्ञविषयतया व्याख्याने अन्तकाले इन्द्रियसंमोहादेरौपचारिकं देहत्यागत्वं किन्तु यदानन्तर्येण देहस्य काष्ठलोष्ठादिसमानकक्ष्यत्वं तदन्त्यक्षणस्य साक्षाद्देहत्यागरूपत्वं यस्मिन् सत्त्वादिप्रधानं किञ्चिद्देहान्तरासङ्गिस्मरणात् शक्तिपातहेतुकात् सुखदुःखमोहात्मकसंविद्रूपभागित्वम् ३२७–३३१

१५५ स्वभ्यस्तास्वभ्यस्तज्ञानविषयतया व्याख्याने अन्त्यक्षणे विश्वोत्तीर्णसंविद्रूपादिस्मरणात् तद्रूपापत्तिः ३३२
१५६ प्राक् चिदधिष्ठेयदेहस्य तादात्म्यवृत्तितः चिदधिष्ठानत्वमेव अत्र मरणं प्रलीनत्वं वा ३३३
१५७ संविदधिष्ठेयत्वाविशेषेऽपि नीलादिभ्यो सर्वाधिष्ठेयपूर्वत्वाद् देहस्य विशेषाभिधानम् ३३४–३३५
१५८ चिति तादात्म्यवृत्तेरभावात् नीलादीनां न प्रलीनत्वम् ३३६
१५९ तादात्म्यवृत्तौ प्राग्जन्मगतान्त्यक्षणस्मरणस्य नैमित्त्यम् ३३७
१६० अनेन देहत्वाविशेषेऽपि प्राणदार्ढ्यस्य नैमित्त्यमिति कल्लटोक्तेरुपपत्तिः ३३८–३३९
१६१ अन्त्यक्षणस्मरणस्य भाविदेहहेतुत्वनिरूपणम् ३४०
१६२ देहान्तरासंगिस्मरणस्य असर्वज्ञप्रमात्रगोचरत्वम् ३४१
१६३ बन्ध्वादिस्मरणस्य देहान्तरासंगित्वाभावात् नाऽन्त्यत्वम् ३४२
१६४ मृगीभावरूपपौराणिकदृष्टान्तेन अनुभवस्य एतादृशस्मरणानुगुण्यप्रदर्शनम् ३४३–३४४
१६५ एतद्वासनाया एव जन्मान्तरहेतुत्वेऽनुभवस्य काकतालीयवदवस्थानम् ३४५–३४६
१६६ भूतभाविनोः स्फुट-स्फुटीक्रियमाणयोः विषययोः भेदाद् अनुभवभावनयोः स्वरूपभेदः ३४७–३४८
१६७ गाढमूढेष्वपि संस्कारप्रबोधोन्मिषितस्मरणद्वारेण भावनायाः देहान्तरवैचित्र्यहेतुत्वम् ३४९–३५०
१६८ देशादिव्यवधानेऽपि भावनायाः भाविविषयत्वाद् देहान्तर-प्रसवने न विप्रतिपत्तिः ३५१–३५२
१६९ देहान्तरोदयस्य भावनामात्रोपनतत्वेऽपि स्वप्नवत् सर्वजनसंवेद्यत्वम् ३५३
१७० स्वप्ने भासमानानां बन्ध्वादीनां स्वप्नद्रष्टृणां वा स्वाप्नवस्तुनः सर्वजनवेद्यताऽनभिज्ञत्वम् ३५४
१७१ प्रमात्रन्तरेणात्र व्यापारव्याहारादिदर्शनाद् अनुमाने स्वप्नजाग्रतोः तुल्यभ्रान्तित्वम् ३५५
१७२ प्रमातृवचोबलाधीनं स्वप्नमिथ्यात्वम् ३५६
१७३ स्वप्नदृष्टप्रमातॄणाम् असद्भावे प्रमाणविरहः ३५७
१७४ प्रमात्रन्तरसद्भावस्य स्वसंविन्निष्ठत्वेऽनुमानस्य प्रामाण्यम् ३५८
१७५ एवं प्रात्यक्षी प्रतीतिरपि ३५९
१७६ प्रबोधस्य भावनानुसारित्वसिद्धिः ३६०
१७७ अतोऽन्त्यक्षणे ब्रह्मविद्याश्रवणपवित्रितस्य पशोर्मुक्तिः ३६१

१७८ अनेन प्रागुक्तगीतावचनस्य अर्थैकतानतोपोद्वलनम् ३६२–३६३
१७९ अत्रैव एतदर्थानभिज्ञानां व्याख्यानान्तरेषु अनुपयोगित्वा-
भिधानं स्वयं तदनूद्य अदूषणे हेतुत्वकथनञ्च ३६४–३६५
१८० स्वमृतिपरीक्षणस्य श्रीशंभुनाथोपज्ञत्वं मृत्युभीतिप्रशमकत्वञ्च ३६६
१८१ मृतितत्त्वाभिज्ञानां देवानां शिवतुल्यत्वम् ३६७
१८२ प्रकृते लौकिकोत्सवानामपि पर्वतुल्यत्वम् ३६८
१८३ विपत्प्रतीकार-प्रमोदा-ऽद्भुतदर्शनेषु विनैमित्तिकेष्वपि
विशेषपूजनाधिक्येन पर्वताप्रतिपादनम् ३६९–३७०
१८४ तदनन्तरं योगिनीमेलकस्य हठतः प्रियतो भेदाद् द्वैविध्यं
मन्त्रोद्धारप्रसङ्गे वक्ष्यमाणत्वञ्च ३७१
१८५ अवश्यंभाविनः ज्ञानलाभाद् योगिनीमेलकस्य तद्वत्
स्वसंतानादिमेलनस्य च नैमित्तिकत्वम् ३७२
१८६ योगिन्यादिसंवित्सु परस्परं प्रतिसंक्रमणात् संकुचितायाः
संविदः सर्वाकारताप्राप्तिरत्रार्थे प्रमाणम् ३७३–३७४
१८७ सर्वाकारत्वे संविन्मयीभावाद् गीतनृत्तादौ प्रत्येकत्र संविदः
आनन्दनिर्भरं पूर्णत्वम् ३७५–३७६
१८८ ईर्ष्यादिसङ्कोचाभावात् तन्मयीभूतानां पूर्णानन्दमयत्वम् ३७७
१८९ अतन्मयेषु संविदः प्रतिघातः ३७८
१९० मेलकादौ अतन्मयस्य प्रवेशनिषेधः तन्मयस्य तु तदनुज्ञानम् ३७९–३८०
१९१ तत्र प्रमादात् प्रविष्टेऽतन्मये आचारभेदनिषेधः ३८१
१९२ तस्य ज्येष्ठाविद्धत्वे तन्मयीभावः, वामाविद्धत्वे तु
समयघातादि ३८२
१९३ प्रवेशस्य सयत्नरक्षणविधाने प्रविष्टस्य विचारनिषेधे च
श्रीमत्पिचुमतप्रामाण्यम् ३८३
१९४ लोकाचारपरे प्रविष्टेऽतन्मये आम्नाताचारनिषेधः तदसन्निहितत्वे
पुनश्चक्रपूजनविधानम् ३८४
१९५ व्याख्याविधिनिरूपणप्रतिज्ञा ३८५
१९६ देव्यायामलशास्त्रप्रामाण्याद् गुरोः पञ्चधात्वम् ३८६
१९७ स्वभ्यस्तज्ञानस्य तदभावे अस्वभ्यस्तज्ञानस्यापि
व्याख्याधिकारित्वम् ३८७
१९८ अत्रार्थे श्रीभैरवकुलप्रामाण्यम् ३८८
१९९ संपूर्णज्ञानताया एव गुरोर्लक्षणत्वेऽपि ज्ञानित्वकर्मित्वादि-
लक्षणभेदानाम् अवान्तरत्वम् ३८९
२०० एतत्समर्थनभङ्ग्या देव्यायामलप्रामाण्याद् गुरोरुच्छुष्मादि-
हुलुहुलान्तदशधात्वप्रतिपादनम् ३९०–३९३

२०१ व्याख्यार्थमेवंविधस्य गुरोरभ्यर्थनीयत्वम् ३९४
२०२ गुरुणा स्वशासनीये परशासनीये वा यथाशक्तिपातं मर्मस्थान-ग्रहणत्यागपुरस्सरं व्याख्यानोपदेशः (श्रुतविधेरपि आसूत्रणम्) ३९५–३९६
२०३ विद्यापीठरचन-देवादिपूजन-चक्रादिसंतर्पणानन्तरं सम्बन्धपूर्वकं व्याख्यानारम्भविधानम् ३९७–३९९
२०४ ससंबधव्याख्यानशैल्याः सविस्तरनिरूपणम् ४००–४०३
२०५ उत्तरकालं दूष्यस्य पूर्वपक्षतया आदावाधानात् शिष्यबुद्धौ अविलम्बमारोहः ४०४
२०६ भाषा-न्याय-वाद-लय-क्रमादीनां शिष्यसंबोधोपायत्वं तदनुसारं गुरुणा व्याख्याश्रयणम् ४०५
२०७ वाच्यसमापने चक्रपूजनं ततोऽपरवाच्यनिरूपणम् ४०६
२०८ व्याख्यान्ते क्षमा-विसर्जनानन्तरं अगाधजले क्षेपः; शास्त्रस्यादौ मध्येऽन्ते च विशेषपूजनविधानम् ४०७
२०९ ततः प्रसङ्गप्राप्तायां समयनिष्कृतावपि विशेषपूजनाभिधानम्; निर्विकल्पानां शास्त्रीयनियन्त्रणाऽभावेऽपि अनुग्रहार्थं प्रायश्चित्ताचरणोपदेशः ४०८
२१० देवीप्रश्नप्रतिवचने स्थितिरक्षार्थं प्रायश्चित्तोपदेशादत्रार्थे श्रीपिचुप्रामाण्यम् ४०९–४११
२११ अतत्त्वविदां चर्यामात्रैकप्रवणानां चित्तदोलनात् ज्ञानक्षयः ४१२
२१२ निर्विकल्पानाम् अतत्त्वविद्भिः सह संपर्कनिषेधः, संपर्के तु दोलारूढमतिपरिहरणार्थं प्रायश्चित्ताचरणविधानम् ४१३–४१४
२१३ अत्र श्रीरत्नमाला-श्रीपूर्व-ब्रह्मयामलानाम् अर्थसंवादनात् प्रायश्चित्तवैचित्र्याभिधानम् ४१५–४१८
२१४ पुनश्च ब्रह्मयामलसंवादाद् एतन्निदर्शनोपबृंहणम् ४१९–४२२
२१५ श्रुतविध्यनन्तरं श्रीसिद्धयोगीश्वरीमतानुसारं गुरुपूजाविधानम् ४२३
२१६ पूर्वोक्तलक्षणोपेतस्य त्रिकार्थविद एव गुरुतया ग्राह्यत्वम् ४२४
२१७ गुरुपूजने इतिकर्तव्यतानिरूपणम् ४२५–४२८
२१८ दक्षिणाभिः गुरुतोषानन्तरं तत्त्वज्ञस्य अधिकारित्वप्राप्तिः ४२९
२१९ गुरुपूजनाऽपूजनाभ्यां बन्धमोक्षावित्यत्रार्थे स्कन्दयामलप्रामाण्यम् ४३०
२२० प्रागुक्तदक्षिणादानस्य यागाङ्गविषयत्वं साम्प्रतिकस्य तु गुरुतुष्टिविषयत्वम् ४३१
२२१ तदनुज्ञया यथाविभवं शिष्यद्वारकचक्रपूजनोपदेशः ४३२
२२२ गुरुयागाऽननुष्ठाने कृतस्यापि सर्वस्य निष्फलत्वम् ४३३
२२३ गुरोरसन्निधाने तस्य सांकल्पिकपूजनविधानं तद्द्रव्यस्य देवतार्थं

भक्तार्थं वा विनियोगः ४३४
२२४ नैमित्तिककर्मनिरूपणोपसंहारः

एकोनत्रिंशमाह्निकम्

१ रहस्यविधिनिरूपणप्रतिज्ञा
२ निर्विकल्पदशारूढप्रायाणां कुलप्रक्रियायामधिकारः १
३ क्रमपूजनोक्तं कुलप्रक्रियावैलक्षण्यम् २–३
४ कुलशब्दव्याख्याने अर्थान्तराणि ४
५ यागस्य तथात्वेन समस्तभावजातदर्शनरूपत्वम् ५
६ वीरस्य सर्वाचरणस्य कुलयागत्वम् ६
७ कुलयागस्य आधारषट्कत्वं प्रतिभेदं विभेदित्वञ्च ७
८ अत्र स्नानादीतिकर्तव्यताविधिनिषेधाऽभावः ८
९ त्रैशिरसमतप्रामाण्यात् संविन्मात्रसारकुलज्ञानस्य अत्रार्थे नैमित्त्यम् ९
१० वास्तवशुद्ध्यशुद्धिविभागाऽभावात् शास्त्रनिषिद्धद्रव्यस्य अत्रोपयोगविधानम् १०
११ श्रीब्रह्मयामलप्रामाण्यात् निषिद्धमध्ये मद्यस्य शिवरसत्वम्, तत्र पिष्टादित्रिविधस्य द्राक्षोत्थस्य च क्रमेण भोगमोक्षोपकरणतया पानोपदेशः ११–१३
१२ श्रीमत्क्रमरहस्यबलात् त्रयाणाम् अर्घपात्र-यागधाम-दीपानां प्राधान्यं तत्र कौलिकाय यतनीयत्वोपदेशश्च १४–१६
१३ अस्मद्दर्शने अर्घैकप्राधान्यात् तदनुगुणद्रव्यजाताभिधाने शङ्कावर्जनम् १७
१४ कुलयागे क्रमनिरूपणं तत्र परा-मालिनी-मातृसद्भावेषु मंत्रत्रयेषु अन्यतमेन दाहा-ऽऽप्यायनरूपशुद्धेः अभिधानम् १८–१९
१५ दीक्षितुकामेन यागोपकरणशोधने शक्त्यैकोपकारित्वम् २०
१६ प्रोक्तमन्त्रत्रये भोगमोक्षभेदात् संपुटभेदपूर्वकं सर्वकर्मसु मालिन्या विनियोगविधानम् २१
१७ आनन्ददायिभिर्द्रव्यैरर्घपात्रप्रपूरणं प्रागुक्तमन्त्रतादात्म्याद् आत्मभैरवताभावनञ्च २२
१८ एवंभावनया बहिरन्तश्च आत्मनः तर्पणोपदेशः २३
१९ पूर्णात्मदिदृक्षया बहिरर्चाविधानम् २४

२० द्वादशाङ्गुलीनां बहीरूपत्वे यागाधारतया निरूपणम् २५–२६
२१ तत्र अर्चाक्रमनिरूपणे क्रमेण सिद्धचतुष्कपूजनोपदेशः २७–२८
२२ पूर्वादिदिक्त्रये पत्नी-सकलत्रपुत्रद्वययोगेन खगेन्द्रादिसिद्धत्रयस्य उत्तरस्यां पत्नी-सकलत्रपुत्रषट्कयोगेन मत्स्येन्द्रस्य पंक्तिक्रमेण पूजनोपदेशः २९–३२
२३ तत्षड्युग्मविशदनम् ३३–३४
२४ एतेषां षण्णां साधिकारत्वं अनवच्छिन्नचित्रसन्ततित्वञ्च ३५
२५ ओवल्लि-मुद्रा-छुम्मा-घर-पल्लि-पीठषट्कक्रमेण एतच्चिन्नत्वप्रदर्शनम् ३६–३९
२६ एतदभिज्ञस्य तत्कालं सिद्धिलाभः ४०
२७ निरधिकारराजपुत्रषट्कस्य नामतोऽभिधानम् ४१
२८ अधिकारस्य कुलवर्त्मनि वीर्यप्रसरत्वम् ऊर्ध्वरेतसस्तु तदप्रसरत्वम् ४२
२९ श्रीमत्कालीकुलोदितानां सपत्नीकगुर्वन्तराणाम् अमूर्तत्वादत्र पूजननिषेधः ४३–४४
३० तत्स्मरणमात्रानन्तरं क्रमेण मातृका-मालिनी-मन्त्रचक्रपूजनोपदेश. ४५
३१ मन्त्रचक्रात्मके कुले चितेः कुलेश्वरीत्वं परा-मातृसद्भाव-पदाभिधेयत्वञ्च ४६–४७
३२ कुलेश्वर्या एव विविधासु पूजासु एकवीरतया यामलक्रमेण वा विनियोगः ४८
३३ उत्तरस्मिन् क्रमे चिदानन्दैकघनयामलस्य तदभिन्नतया रश्म्योघरूपदेवतागणस्य च पूजनोपदेशः ४९-५०
३४ रश्मीनां द्वादशके अष्टाष्टके चतुष्के च पूज्यतया उपात्तेऽपि तासामिच्छानुविधायित्वाद् आनन्त्यम् ५१
३५ तथापि मुख्यया वृत्त्या अष्टकद्वयस्य यामलक्रमेण संपूजनोपदेशः ५२–५३
३६ दीपचरोरेव प्राधान्याद् दीपमालाया अष्टाष्टकत्वम् ५४
३७ दीपानां मूलविद्याक्षरसंख्याकत्वम् इति प्रकारान्तरे श्रीरत्नमालाशास्त्रप्रामाण्यम् ५५
३८ श्रीमाधवकुलसंवादात् पीठक्षेत्रादियुक्तकुलक्रमपूजनविधानाद् अर्चाप्रकारे मतान्तरासूत्रणम् ५६–५७
३९ देहे पीठानां स्थाननिर्देशः तेषाञ्च चक्रन्यस्यत्वेन स्मरण-विधानम् ५८–६३
४० स्मरणेन पीठतत्शक्तीनामहंतयानुसंधानात् तद्वृत्तिपरत्वात् सिद्धिः ६४–६५

४१ न्यस्यपीठविधिदृष्ट्या चक्रस्य तद्गतमातङ्गादिगुरुतत्पत्नीनाञ्च नवधात्वम् — ६६

४२ तद्गृहाणामेव नवविधपीठत्वं तासां चक्रिण्याः मुख्यत्वम् — ६७

४३ चक्रोदये कुण्डलिनीतया मध्ये कुलेश्वरीतया, अन्ते च संकर्षिणीतया एकवीरक्रमेण यामलक्रमेण च चक्रयुक्ताया अस्या एव पूजनोपदेशः — ६८–६९

४४ पीठानां श्मशानयोगिनीसाहित्येन त्रिशस्त्रिशः पूजाविधानम् — ७०–७१

४५ चतुर्विंशतिदीपानां सर्पिषा नैवेद्यतापादनम् — ७२

४६ यागमध्यानुष्ठितस्य अद्वैतरूपत्वं सिद्धान्ताद्युक्तमन्त्राणां समलत्वान्निर्जीवत्वमित्यत्र पक्षान्तरम् — ७३–७४

४७ अतः तत्रत्योपकरणजातमपहाय अत्रत्याश्रयणाद् अयत्नतः मन्त्रसिद्धिः, पीठस्तोत्रपाठविधानञ्च — ७५–७७

४८ यद्वा वीररूपाणां युग्मरूपाणां वा केवलशक्तीनां पूजनविधानम् — ७८

४९ केवलशक्तिपक्षे कौलेशस्य यामलयोगेन शक्तितर्पणात् पूजासंपत्तिः — ७९

५० संविदि भेदाश्रयक्रमाभावात् तर्पणस्य देशकालानवच्छिन्नत्वम् — ८०–८१

५१ श्रीयोगसञ्चारप्रामाण्यात् क्रमप्राप्तजपस्य चित्रस्वरूपत्वे स्थानभेदात् त्रिलक्षादिषोडशलक्षान्तभेदवत्त्वनिर्णयः सर्वत्र च दशांशेन होमविधानं प्राणस्य द्विर्भ्रमणञ्च — ८२–८८

५२ द्विर्भ्रमणस्य विकासाङ्कुचनात्मकत्वान् निर्गमप्रवेशपरत्वं नरशक्तिशिवात्मकत्वञ्च — ८९

५३ अतः प्राणात्मनोः भेदेन विकल्पननिषेधः, तथात्वे सिद्धिमुक्ति-विदूरत्वात् प्राणचारे षोडशलक्षादिजपविधानम् — ९०-९१

५४ एकान्तादिलक्षणाभिधानपूर्वकं होमस्य दशांशताभिप्राय-निरूपणम् — ९२–९५

५५ श्रीशंभुनाथोपज्ञतया दौतविधिनिरूपणोपक्रमे बाह्यस्थशक्त्या साकमर्चनस्य रहस्यविधिसंज्ञित्वम् — ९६

५६ श्रीयोगसंचारप्रामाण्याद् देहे मद्यमांसयोरुपायतया मैथुनस्य फलतया आनन्दब्रह्मैक्यात् त्रितयसेविनः ब्रह्मचारिपद-व्यपदेश्यत्वम् — ९७–९८

५७ कुलमार्गविहिताऽकारिणां तद्वर्जितकारिणाञ्च पशुत्वं रौरवगामित्वञ्च — ९९

५८ तद्व्रतोऽभेदित्वं मुख्यलक्षणत्वाद् दूतीचयने वर्णाद्यप्रासंगिकत्वम् — १००

५९ जन्या-जनिका-सहजानां साक्षात्पारम्पर्येण वा द्वैधे दूतीनां षड्विधत्वम् — १०१–१०२

६० अत्रार्थे श्रीसर्वाचारहृदयप्रामाण्यम् १०३
६१ शक्तिशक्तिमतोः मेलकरूपत्वात् ज्ञानि-दूतीभ्याम् अन्तरङ्ग-क्रमेण मुख्यचक्रपूजनस्य उपदेशः १०४
६२ आनन्दसंदोहिनोऽन्तरङ्गत्वं मुख्यचक्रत्वम् अतथाभूतस्य च अनुचक्रत्वम् १०५
६३ चक्रशब्दप्रवृत्तौ धातुचतुष्टयनिमित्तत्वम् १०६
६४ बहिर्यागस्य तर्पणत्वं विकासपदव्यपदेश्यत्वञ्च १०७
६५ चक्रानुचक्रान्तरगात्पानाद्यात्मनः बाह्यात् चितो विकासः १०८
६६ अनुचक्रतर्पणान्मुख्यचक्रैकात्म्यलाभः १०९
६७ अत्रार्थे त्रिशिरसस्तन्त्रसंवादः ११०
६८ स्वस्वभोगेन स्वात्मचमत्कारोल्लासादनुचक्रदेवीनां मध्यमसंविच्चक्रविश्रान्तिः १११
६९ तनुमात्रस्थानां स्ववृत्त्यौदासीन्याद् बहिरौन्मुख्याभावः ११२
७० अनुचक्रदेवीनां मुख्यचक्रविश्रान्त्या शक्तिशक्तिमतोः युगलस्य संघट्टासादनम ११३
७१ तादृग्युगलेन अनुचक्राणामपि क्षोभात् तेषां तन्मयत्वम् ११४
७२ एवंभूतयामले संघट्टविसर्गोदयः तस्य शान्तोदितावस्थाद्वय-हेतुभूतकौलसविद्रूपत्वम् ११५–११६
७३ एतत्संविदावेशस्य अवश्यंकरणीयत्वम् ११७
७४ शक्तिशक्तिमदुभयगतत्वेन शान्तोदितरूपयोः उदयविलया-मर्शनेन वैसर्गिकधामप्रवेशः ११८–११९
७५ तयोर्मध्ये उदितस्य पारस्परिकत्वं शान्तस्य आत्मगतत्वमिति-विशेषेऽप्युभयोर्यामलरूपत्वम् १२०
७६ उभयसाम्येऽपि शक्तेरेव गर्भधारकत्वं न तु शक्तिमतः १२१
७७ अतः शक्तेः प्रविकस्वरमध्यधामत्वं कुलार्थसंक्रमणे योग्यत्वं गुरुणा नृषु तद्द्वारा ज्ञानसञ्चारणञ्च १२२
७८ प्रोक्तसमस्तार्थसंग्रहार्थं गुरुणा शक्त्याश्रयणे श्रीमत्कल्लटनाथ-वाक्यसंवादनम् १२३
७९ योगिनीवक्त्रस्य मुख्यचक्रत्वम् यत्र संप्रदायानुष्ठानात् ज्ञानसंप्राप्तिः १२४
८० वक्त्राद्वक्त्रस्थज्ञानस्य अलेख्यत्वम् १२५
८१ शान्तोदितधामद्वये विसर्गसत्तानुसंधानाद् अनवच्छिन्नपद-विश्रान्तिः १२६
८२ एवं बुभुक्षूणामपि कृते कुलसंज्ञकाभ्युदितरूपस्य परस्परवक्त्र-गत्वेन आहरणस्य तेन च पूजनस्य विधानम् १२७–१२८

८३ चर्यामात्रैकरूढानामप्यत्रैव चक्रस्थदेवतापरिकल्पनेन विज्ञानोपलब्धिः १२६

८४ शक्तिगतमुख्यचक्रेऽभ्युदितेन रूपेण चक्रस्थदेवतानां यथायथं पूजनविधानम् १३०–१३२

८५ देहगतशान्तात्मनि चक्रेऽपि आसां पूजनात् शान्तशिवपदावाप्ति-रासाम् उपरतवृत्तित्वान्निरानन्दम् १३३–१३४

८६ अनुचक्रस्थदेवतागणस्यापि स्वरूपलाभाय औन्मुख्याद् आनन्दसाकांक्षत्वम् १३५–१३६

८७ अस्य करणरश्मिगणस्य निजनिजविषयार्पणवशाद् चक्रेश्वरस्यापि बहिरौन्मुख्यम् १३७–१३९

८८ विसर्गशब्दस्य प्रवृत्तिनैमित्त्यं संघट्ट-प्रोदित-शान्ततया त्रैविध्यञ्च १४०

८९ अत्रार्थे श्रीतत्त्वरक्षणादिशास्त्रत्रितयोपज्ञताप्रदर्शनार्थं क्रमेण मेलक-कुण्ड-लिङ्गतया श्रीगमशास्त्रसंवादनम् १४१

९० स्त्रोतोद्वयस्य मध्यधामविश्रान्तिपर्यन्तं समावेशानन्तर्येण शान्तोदितयोः निराकारभावसंप्राप्त्या अनुभवाभिव्यञ्जकत्वकथने त्रिशिरोभैरवप्रामाण्यम् १४२–१४५

९१ अत्रैव अभ्यासोपदेशः १४६

९२ त्रिविधविसर्गसमावेशे स्वारसिकपरामर्शस्य मन्त्रवीर्यत्वं तत्रैव मन्त्रोदयवेतृत्वम् १४७–१४८

९३ अत्रैव नादवृत्त्या मुहुरनुसंधानविधानम् १४९

९४ त्रिदलस्य कमलस्य मध्ये रजोरेतःकलानां सङ्गाद् अङ्कुरस्य सृष्टित्वमिति श्रीयोगसञ्चराभिधानाद् अस्यैव मुद्रावीर्यत्वम् १५०–१५२

९५ अनेन मुद्राबन्धेन तुर्यस्थितिलाभः १५३

९६ षडरमुद्रायामावेशे शक्तिशक्तिमतोरन्योन्यस्य पानोपभोग-विमर्शस्य अव्यक्ताद्यष्टभेदभिन्नपरनादमयं मान्त्रवीर्यत्वम् १५४–१५५

९७ अत्रैव चक्राष्टकरूडस्य सततजपवशाद् अष्टकलाभेदित-भैरवाष्टकपदलाभः १५६

९८ चक्राष्टकस्वरूपम् १५७

९९ कुचादारभ्य ओष्ठपुटपर्यन्तम् अष्टविधनादभैरवत्वम् तस्यैव मान्त्रीव्याप्तित्वम् १५८–१५९

१०० भैरवाष्टकस्य नाम्ना निर्देशः चन्द्रादुन्मनन्ताया व्याप्तेर्निदर्शनम् १६०

१०१ एवं व्याप्तिभावनादस्य जीवन्मुक्तिः परभैरवीभावश्च १६१

१०२ एवंविधमेलकाद् गृहीतजन्मनः योगिनीभूपदव्यपदेश्यत्वं श्रीवीरावलिशास्त्रप्रामाण्याद् गर्भगत्वेऽपि शिवरूपत्वम् १६२–१६३

१०३ श्रीवीरावल्याद्यनेकशास्त्रार्थगर्भीकाराद् अत्र मुख्यचक्रयागे आदियागशब्दप्रवृत्तिः १६४–१६५
१०४ मन्त्रमुद्रात्मपीठद्वयानुसंधानमात्रेण आदियागपरायणस्य विद्यामन्त्रयोर्न्यासाद् विद्यामन्त्रात्मकपीठयुग्मस्य अत्रैव मेलनविधानम् १६६–१६८
१०५ एतन्मेलनस्यातिरहस्यरूपत्वम् १६९
१०६ अत्रैव देहस्य लिङ्गतया पूजाधामतया च मुख्यमण्डलत्वं यत्र सदा देवताचक्रपूजनस्य आनन्दसंदोहिभी रसैः शान्तोदितक्रमेण तत्स्पर्शस्य च विधानम् १७०–१७३
१०७ तत्स्पर्शोद्बुद्धसंविच्चक्रेश्वरस्य परमधामलाभः १७४
१०८ अनुयागोक्तविधिनाऽपि एवमेव अन्तःतर्पणविधानम् १७५
१०९ अत्र निजस्तोत्रैकदेशसंवादः १७६
११० श्रीवीरावल्यादिमर्यादया देहस्य परमयागत्वम् १७७
१११ देह इव प्राणेऽपि अपानचान्द्रचक्रेण देवतागणतर्पणोपदेशः येन अविलम्बं ज्ञानसिद्धिः १७८–१८०
११२ यद्वा देहादिभिः संविन्निष्ठतयैव देवीचक्रतर्पणोपदेशः १८१
११३ देहस्थसंविदः कालानलसमप्रभात्वदर्शनाद् एवंतर्पणम् १८२
११४ अत्रार्थे श्रीवीरावलिशास्त्रप्रामाण्यात् सर्वदेवतासंकेतस्थानतया श्मशानप्राये स्वात्ममात्रविश्रान्ते शरीरे प्रविष्टस्य सर्वस्य सिद्धिः १८३–१८५
११५ दीक्षाविधिनिरूपणोपक्रमः तत्र निर्णीतौचित्ये शिष्ये दीक्षाविधानम् १८६
११६ तत्रेतिकर्तव्यतायां शिवहस्तविधिनिरूपणम् १८७–१९०
११७ तत्र शिष्यहस्तयोः प्रेर्यत्वेन तन्मूर्ध्नि च प्रेरकत्वेन देवीचक्रार्चनोपदेशः १९१
११८ पक्षान्तरे श्रीरत्नमालोक्तनीत्या करस्तोभस्य सद्यःप्रत्ययकारकत्वम् १९२–१९४
११९ अनेनैव विधिना गुरुणा शिष्यद्वारा चरोः दन्तकाष्ठस्य च ग्राहणं पातनञ्च १९५
१२० नेत्रपटग्रहाद्यात्मना करस्तोभेन लक्षितस्य शक्त्यावेशस्य शक्तिपातवैचित्र्योपकृतत्वम् १९६
१२१ श्रीपूर्व-भोगहस्तकप्रामाण्यात् करस्तोभस्य समयित्वे हेतुत्वम् १९७
१२२ श्रीमदानन्देश्वरोक्ते प्रक्रियान्तरे चर्वादेरादाने निश्शङ्कस्य निर्विकल्पसविन्मयत्वं सशङ्कस्य च समयित्वं क्रमेण सिद्धिभागित्वञ्च १९८–२००

१२३ ततः पुत्रकदीक्षानिरूपणे मालिनीन्यासे श्रीरत्नमालोक्त-
क्रमनिरूपणम् २०१
१२४ तत्र गुरुणा शक्त्यनुसंधानात् शिष्यगतपाशतत्त्वकलादि-
शोध्यदाहानन्तरं शिवे योजितायाः शक्तेः सजातीयपोषकत्वं
विजातीयदाहकत्वञ्च २०२–२०६
१२५ एवं दग्धपाशे शिष्ये रुद्रशक्तिसमावेशात् चिति-शून्य-प्राण-बुद्धि-
बहिर्देहेषु शक्तिपाततारतम्यवशात् क्रमेण आनन्दोद्भवकम्प-
निद्रा-घूर्णीनां पञ्चचिह्नानाम् उदयः २०७–२०८
१२६ स्तोभितपाशस्य शेषभोगवशात् तदैव देहपाताऽप्रसक्तिः २०९
१२७ अनायातशक्तिपातत्वाद् अनावेशे शक्त्या शिष्यस्य बहिरन्तर्दाहस्य
लोष्ठवत्परित्यागस्य वा विधानम् २१०
१२८ एवं परित्यक्तशिष्यस्यैव संसारविषयत्वे सद्भावशासने
सप्रत्ययदीक्षोपदेशः २११
१२९ तत्र सबिन्दुस्त्र्यूमादिपिण्डत्रयस्य व्यस्तत्वेन स्तोभकारित्वम् २१२–२१३
१३० अत्रैव इतिकर्तव्यताविधाने पिण्डत्रयमध्यादेकतमस्य मन्त्रस्य जपात्
शिष्यस्तोभाभिधानम् २१४–२१६
१३१ अनेन शिष्यस्य क्रमेण सर्वाध्वदर्शनसंपत्तिः
सर्वशास्त्रवेदकत्वञ्च २१७–२१८
१३२ प्रतिनियतभोगेच्छुं प्रति योग्यतावशात् पृथक्तत्त्वाभ्यासविधानम् २१९
१३३ अस्य शेषवृत्तितया जाग्रदादिपञ्चावस्थासमन्वित-
कुलक्रमयागविधानम् २२०–२२१
१३४ एवं जाग्रति सर्वमन्त्रस्य, स्वप्ने एकस्य, सुषुप्ते भैरवत्रयस्य
कुलेश्वर्योः, तुर्ये कुलेश्वर्याः, तुर्यातीते कुलेश्वरस्य पूजाप्रवृत्तिः २२३
१३५ पिण्डस्थाद्यवस्थापञ्चकेऽपि अस्यैवातिदेशः २२४
१३६ ततः क्रमेण दीपाष्टक-चतुष्षष्टिपूरणभेदात् कुलेश्वरयोः
कुलाष्टका-ऽष्टाष्टकपूजनभेदात् शिवहस्तप्रकरणोदिताध्वना
साधकाचार्ययोः अभिषेकविधिनिरूपणम् २२५–२२९
१३७ अभिषिक्तयोरनयोर्मध्ये तुर्यपादव्याख्यापुरस्सरं सिद्धिप्रदत्वम्
आचार्यस्य च मुक्तिप्रदत्वम् २३०–२३१
१३८ अनयोः शाम्भवादित्रिविधज्ञानवत्त्वं स्वक्रियानुष्ठानार्थम्
आज्ञादानसामर्थ्यञ्च २३२
१३९ श्रीवीरावलिभैरवप्रामाण्याद् ब्रह्माद्यष्टकस्य प्रत्येकं तादात्म्येन
वृत्तेरात्मङ्गमीकरणात् शिष्ये गुरुद्वारा संक्रमणस्य पराभिषेक-
शब्दव्यपदेश्यत्वम् २३३–२३५

१४० ततो वेधदीक्षानिरूपणोपक्रमः, तस्य बुभुक्षुविषयत्वं
स्वभ्यस्तयोगाधिकारित्वम् २३६
१४१ वेधदीक्षाया बहुधात्वम्, तत्र ऊर्ध्वोर्ध्वप्रवेशात् शिष्यस्य चक्रभेदनम्,
तदभावे पिशाचावेशभागित्वे श्रीमालाप्रामाण्यम् २३७–२३८
१४२ श्रीगह्वरप्रामाण्याद् वेधदीक्षायाः मन्त्र-नाद-बिन्दु-शक्ति-
भुजङ्गम-परात्मकषोढात्वम् २३९
१४३ तत्रत्यग्रन्थपाठाद् अष्टारादिके मन्त्रचक्रवेधनात् मन्त्रवेधनम् २४०
१४४ अस्य नवधान्यासयोगेन नाद-बिन्दु-शक्तिवेधेषु श्रीमद्दीक्षो -
त्तरोक्तं क्रमान्तरम् २४१–२४७
१४५ श्रीभैरवागमप्रामाण्यात् फणपञ्चकभूषितत्वाऽभिधानपूर्वकं
भुजङ्गवेधनिरूपणं येन चित्तक्षये परानन्दलाभः २४८–२५२
१४६ परवेधस्य सर्वभावपरिक्षीणत्वम् २५३
१४७ प्रकारान्तरेण मन्त्र-शक्ति-भुवन-रूप-विज्ञान-पिण्ड-स्थान-नाडि-
परभेदाद् वेधस्य नवधात्वम् २५४
१४८ तत्र मन्त्रवेधः २५५–२५६
१४९ शाक्तवेधः २५७–२५८
१५० भुवनवेधः २५९–२६०
१५१ रूपवेधः २६१–२६२
१५२ विज्ञानवेधः २६३–२६४
१५३ पिण्डवेधः २६५–२६६
१५४ स्थानवेधः २६७
१५५ नाडीवेधः २६८–२६९
१५६ परवेधः, तेन महायोगिनः गुरोः शिवताप्रदत्वम् २७०–२७१
१५७ श्रीमद्वीरावलिप्रामाण्यात् मन्त्राद्यात्मविभागे सिद्धस्य गुरोरेव
मोचकत्वम् २७२
१५८ गुरुणा स्ववक्त्रादौ शिष्यवक्त्रादेरासामरस्यं वेधनाद्
एतन्निष्पत्तिः २७३
१५९ एतेनोभयोरौन्मनस्ये तत्कालं दीक्षितत्वं प्राणापानसामरस्ये
जीवस्य तन्मयतापत्तिः २७४–२७५
१६० ब्रह्मादीनामप्यत्र मोक्षकांक्षित्वम्, भोगमोक्षोभयग्रासाद् अस्याः
शार्वीदीक्षात्वेन कीर्तनम् २७६
१६१ प्राणापानात्मकलानामाघातैः बहिर्मुखताशमनाद् अस्यैव
निःस्पंदमोक्षसंज्ञित्वम् २७७
१६२ बहिर्मुखताप्रशमनविधेरूपबृंहणं यत्र देहस्य बहीरूपताऽनु-
संधानाद् दीक्षायाः शिवतादायित्वोपपत्तिः २७८–२८१

१६३ दीक्षान्ते दीपकपाकपूर्वकं पातकप्रशमनार्थं चरुप्राशनम् २८२
१६४ ऊनाधिकविधेः पातकरूपत्वम् २८३
१६५ पूर्णतार्थं परस्मिन्नहनि यागविधानम् २८४
१६६ अतत्यविधेः संचारपदव्यपदेशः २८५
१६७ अत्र क्रमेण आचार्यकरस्थस्य अलिपात्रस्य पान-भूततर्पण-गुरुनिवेदनाभिधानम् २८६
१६८ गुरुविनिवेदने क्रमनिरूपणम्, ततः वीरस्पृष्टद्रव्यस्य स्वयंपानोपदेशः २८७–२८८
१६९ अतत्त्वज्ञैः सह ईदृगाचरणनिषेधः २८९–२९०
१७० एतदनुष्ठानकालनिरूपणम् २९१
१७१ रहस्यविधिपरिचर्चोपसंहारः

त्रिंशमाह्निकम्

१ पूर्णविमर्शसिद्धये त्रिककुलक्रमोपयोगिमन्त्रनिरूपणप्रतिज्ञा १
२ मन्त्राणां विमर्शस्वभावत्वं करणत्वेऽपि चित्स्वातन्त्र्यतादात्म्यात् कर्तृतामयत्वञ्च २–३
३ आधारशक्तितः शूलशृङ्गपर्यन्तं पृथगासनपूजने ह्रीं-आदीनां जूं-अन्तानां मन्त्राणां क्रमेण, संक्षेपपूजने तु ह्रीं-जूंयोः बीजत्वेन च निरूपणम् ४–१०
४ रतिशेखरमन्त्रस्य ऊकारबिन्द्वादियुक्तनवात्मत्वनिरूपणम् ११
५ श्रीमत्त्रैशिरसप्रामाण्याद् बिन्द्वादिव्याप्तीनां क्षेपादिभिः व्यपदेशान्तरैरभिधानं मूर्तित्वञ्च १२–१३
६ मूर्तिवन् नमस्कारस्यापि व्याप्तित्वाभिधाने भैरवसद्भाव-मन्त्रस्य निरूपणम् १४–१६
७ प्रागुक्तमातृकामालिनीमन्त्रयोः स्मरणम् १७
८ गणेशादिमन्त्रः १८–१९
९ अघोर्यादित्रितयमन्त्रः २०–२१
१० तत्र शक्तिद्वयमन्त्रस्य वमनि-पिवनिरूपत्वम् २२
११ श्रीत्रिकशासनानुसारम् अस्य परापरदेव्याः विद्यात्वम् अघोर्यादौ सप्तके पिवन्याः परिशिष्टत्वम् २३–२४
१२ सिद्धयोगीश्वरीमतप्रामाण्याद् देवताचक्रविन्यासस्य प्रत्येकवर्ण-गामित्वे बहुत्वादनभिधानम् २५

३६ चतुर्दशपदात्मकं सप्तममार्यावाक्यं तस्य निःश्वासशासने क्रमभेदः ७६–७७
४० नवपदात्मकम् अष्टममार्यावाक्यम् ७८–७६
४१ चतुर्दशपदात्मकं नवममार्यावाक्यम् ८०
४२ निःश्वासमुकुटोत्तरादिषु उपर्युक्ताग्नीषोमादेः पदविभागादत्र पञ्चदशपदात्मकत्वम् ८१
४३ षट्पदात्मकं दशममार्यावाक्यार्धम्, श्रीमुकुटोत्तरप्रामाण्यात् तस्य द्विगुणत्वम् ८२–८३
४४ त्रयोदशपदात्मकम् एकादशमार्यावाक्यम् ८४
४५ षट्पदात्मकं द्वादशमार्यावाक्यार्धम् ८५
४६ सप्तपदात्मकं त्रयोदशमार्यावाक्यार्धम् ८६
४७ सप्तपदात्मकं चतुर्दशमार्यावाक्यार्धम् ८७
४८ अष्टपदात्मकं पञ्चदशमार्यावाक्यार्धम् ८८
४६ ब्रह्मविद्यायाः पञ्चदशवाक्याभिधेयत्वम्, निष्कलाया ब्रह्मविद्यायास्तु पञ्चाक्षरवाक्याभिधेयत्वम् ८६
५० तारादिपञ्चाक्षरनिरूपणपुरस्सरं निष्कलब्रह्मविद्यायाः निरूपणं यया ब्रह्महन्तुरपि विशोधनम्, यत्र तुलाशुद्धेः सद्यः प्रत्ययकारकत्वम्, भैरवहृदयस्य सर्वसंहारकत्वम् ६०–६५
५१ भैरवहृदयात् शाकिनीनां वशीकरणं ततः तासां विसर्जनम्, ततः प्रियमेलापनाख्यसंपुटजापविधानम् ६६–६८
५२ तंत्रसद्भावे शंभुनाथोपदर्शितं तुलामेलकयोगत्वम् ६६
५३ सन्तत्यागमानुसारेण वित्ताभावेऽपि प्रपन्नानां दीक्षाविधिनिरूपणोपक्रमः १००-१०१
५४ तत्र कन्द-हृदय-कण्ठ-मूर्धातलभेदात् पूज्यानामाकलनम्, मूर्धतले विद्यात्रयभावनम् १०२–१०४
५५ एतद्दीक्षायाः मुमुक्ष्वैकविषयत्वम् १०५
५६ एनया दीक्षितस्य देहान्ते परधामगामित्वम् १०६
५७ एतद्विद्यात्रयनिरूपणम् १०७
५८ तत्र पञ्चाष्टरन्ध्रत्र्यष्टार्णक्रमेण पदपञ्चकविशदने परब्रह्मविद्या-दीक्षाविद्या-पारमेश्वरीविद्यानां क्रमेण पञ्चाशदेकोनपञ्चाशत्-सार्धपञ्चाशद्वर्णता १०८–११६
५६ एतद्विद्यात्रयप्रतिपादनस्य श्रीभूतिराजोपज्ञत्वम् १२०
६० मन्त्राणां बहुविधवीर्यस्य पूर्वोक्तत्वादिह तत्पुनरभिधाने नैष्फल्यापत्तिः १२१–१२२
६१ मन्त्रविद्यादिस्वरूपवर्णनोपसंहारः १२३

एकत्रिंशमाह्निकम्

१ संक्षेपेण मण्डलस्वरूपनिरूपणप्रतिज्ञा
२ तत्र सूत्रस्य क्रमेण अर्धार्धमानानामवलम्बनेन रचितेषु दिशां प्रतिकोणगेषु मत्स्येषु वेदात्मचतुस्सूत्रदानात् चतुरस्रसिद्धिः १–६
३ अत्र सिद्धातन्त्रप्रामाण्यात् मण्डलानां शतत्वे मध्य-त्रि-नवशूलात्मकस्य मण्डलत्रयस्य मध्यस्थताभिधानम्, तद्योनिमण्डलयोरभिधाने च सद्भावक्रमोपजीव्यत्वम् ७–९
४ त्रिशूलवर्तनोपयोगिनः सर्वक्षेत्रस्य षोडशभिर्भागैः विभाजनम् १०
५ तत्र पार्श्वश्रृङ्गैकवर्तनानिरूपणम् ११–१७
६ अस्यैव द्वितीये पार्श्वश्रृङ्गेऽतिदेशः १८
७ मध्यश्रृङ्गवर्तनानिरूपणम् १९–२१
८ एवं पूर्वक्षेत्रे वर्तनाभिधानानन्तरं पश्चात्तनेऽपि मध्यश्रृङ्गवर्जनपूर्वकं पूर्वोदितविधिना वर्तनाया अभिधानम् २२–२३
९ दक्षिणोत्तरपार्श्वयोः श्रृङ्गवर्तनानिरूपणम् २४–२५
१० त्रिशूलत्रयाधोवर्तिनाम् एकद्वयादिक्रमेण द्वादशारादिपद्मचक्रादीनां समासव्यासभेदात् पद्मानां चक्राणां च सप्तकस्य वर्तनाप्रकारनिरूपणम् २६–२८
११ तदनन्तरं त्रिशूलादिवर्तनार्थं परिगृहीतक्षेत्रार्धमानेन अधिकक्षेत्रोपक्षेपः २९
१२ तत्र तरङ्गाख्यकुण्डलिन्या अवस्थानपूर्वकं दण्डवर्तनानिरूपणम् ३०–३१
१३ ततो दण्डद्वारवर्तनानिरूपणम् ३२
१४ श्रृङ्गवर्तनायाः द्वादशधात्वम् अन्तर्बहिर्मुखत्वेन तस्या अपि द्वैविध्यम् ३३–३५
१५ भेदानामपि प्रभेदनात् मण्डलभेदानाम् आनन्त्यम् ३६–३८
१६ ततः चन्द्रसमा-रक्ता-कालीसंज्ञस्य परा-परापरा-ऽपरेति देवीत्रयस्य योगेन रजोदाननिरूपणम् ३९–४०
१७ एतन्मण्डलदर्शनाद् देवी-नर्तनं मातृभिर्दीक्षणञ्च इत्येवं मण्डलमाहात्म्यनिरूपणोपक्रमः ४१
१८ त्रिशूलभेदानां सार्धशतद्वयोत्तरषट्सहस्रत्वम् ४२
१९ अत्र प्राणस्थपरादेव्याः तत्त्वानां तद्देवीनाञ्चावस्थानम् ४३–४४
२० शूलत्र्यरस्थेच्छादीनां भोगमोक्षप्रसाधकत्वम् ४५
२१ भूतिमुक्तिलाभार्थं मण्डलमहायागपूजनोपदेशः ४६–४७
२२ मण्डलपूजनाद् भूतादिपलायनम्, शिवप्रसादः, मन्दशक्तिपातस्य त्रिकज्ञानोदयाद् देहान्ते भैरवताऽधिगमश्च ४८–४९

२३ मण्डलव्याप्त्यादिविदः त्रिकशास्त्रे गुरुत्वं तस्य पादरजो-
धारणविधानम् ५०–५१
२४ त्रिशूलत्रये सृष्ट्यादित्रयस्य मध्ये च तुर्यस्य पूजनविधानम् ५२
२५ गुप्तदण्डस्य चतुस्त्रिशूलस्य यागे एतदतिदेशेन क्रमचतुष्टय-
पूजनोपदेशः ५३
२६ अत्रार्थे षडर्धहृदय-सिद्धयोगीश्वरीमतयोः अभिधानसूचनाभ्यां
प्रामाण्यम् ५४
२७ षडर्धहृदयपाठात् शूलस्य अष्टधा त्रिधा वा प्रकर्तव्यतायाः
खेचरीपुरस्य च निर्देशनम् ५५–५७
२८ अत्रार्थे श्रीसिद्धातन्त्रप्रामाण्यम् ५८–५९
२९ श्रीपूर्वादिशास्त्रान्तरैरुक्तस्य शूलाब्जविन्यासस्य
स्पष्टाभिधानोपक्रमः ६०–६१
३० प्रथमं श्रीपूर्वशास्त्रोक्तशूलविन्यासनिरूपणं तत्र चतुर्हस्तेन
अस्य त्र्यङ्गुलैः द्वात्रिंशद्धाविभाजनात् शूलसिद्धिः ६२–६३
३१ दक्षिणोत्तरपार्श्वयोश्चतुर्थेन जीवसूत्रेण पूर्वस्यां दिशि
अन्तर्मुखभ्रमद्वयानुष्ठानेन भागमानभागार्धमानं खण्डचन्द्रयोर्द्वयं
द्वयम् इति पार्श्ववर्तनाऽभिधानम् ६४–६६
३२ ततः ब्रह्मसूत्रस्याग्रे लग्नस्य सूत्रद्वयस्य विधानात् मध्यशृङ्ग-
वर्तनानिरूपणम् ६७–६८
३३ तदग्रमण्डलगतपार्श्वयोः तृतीयाज्जीवात् पूर्वोक्तगत्या षष्ठभागान्तं
सूत्रस्य नयनात् पार्श्वशृङ्गवर्तनम् ६९–७०
३४ अपरस्मिन्नपि क्षेत्रार्धे मध्यसूत्राणां प्रतिपार्श्वं भागचतुष्टयग्रहेण
दण्डवर्तनानिरूपणम् ७१–७३
३५ दण्डक्षेत्रगतभागचतुष्टयस्थितस्य पद्मस्य वर्तनाऽभिधाने
तृतीयवृत्ते षोडशदलार्धोत्पादननिरूपणम् ७४–७६
३६ तत्र एकैकदलस्थकेसरस्थानीयसूत्रतयाश्रयणेन पत्राग्रत्वसिद्धिः ७७–७८
३७ अत्रैव सितरक्तपीतकृष्णैः चतुर्भिः केसरजालकैः शृङ्गत्वं
सितरक्तपीतैस्त्रिभिः मण्डलत्वमिति रजोनियमाभिधानम् ७९–८२
३८ एतच्छेषभूतस्य द्वारस्य वैचित्र्यप्रदर्शनम् ८३–८४
३९ ततः श्रीदेव्यायामलोक्तशूलविन्यासोपन्यासः तत्र द्वादशभागमाने
क्षेत्रे मध्यस्थब्रह्मपदैकपार्श्वेन यथायथमूर्ध्वं भ्रमणात्
खण्डचक्रयुग्मत्रयवर्तनम् ८५–८७
४० ततः चतुर्थेन शृङ्गारकेणापि खण्डचक्रयुग्मयोजनम् इति
पार्श्वारवर्तनाविधिनिरूपणम् ८८

४१ प्रागुक्तविधिना सूत्रं विधाय क्रमेण वैपुल्याद् अंशांशह्रासेन योजनात् मध्यारवर्तनानिरूपणम् ८९–९०

४२ उभयोः पार्श्वयोः अश्वत्थपत्ताकारतया भ्रमोदयाद् दण्डस्य अधोवर्तनम् आमलकसारत्वञ्च ९१

४३ षोडशसूत्रविभक्तक्षेत्रे द्वादशाङ्गुललोपनाद दण्डोपरि अरोपर्यपि च मध्यभागे पद्मलेखनविधानम् ९२

४४ द्वादशाङ्गुललोपनेनैव दक्षिणोत्तरकटिस्थपद्मलेखनविधानं तत्र शूलमध्ये ईशस्य ऊर्ध्वादिषु परादिदेवतात्रयपूजनविधानम् ९३-९६

४५ कालसंकर्षिण्याः परातीतत्वं सर्वत्र व्याप्तिश्च ९७

४६ परादिदेवीनां शान्त्यादिकलासु व्याप्तिप्रदर्शनम् ९८

४७ भैरवस्य स्थौल्ये सदाशिवात्मकत्वं शान्त्यादेश्च तच्छक्तिचतुष्टयरूपत्वं डामराख्ययागत्वञ्च ९९

४८ त्रैशिरसोक्तशूलाब्जविन्यासविधिनिरूपणम् १००–१०४

४९ दण्डत्रिशूलयोः भागत्रयस्य अष्टाङ्गुलप्रमाणत्वमिति त्रिशूलवर्तनोपयोगिक्षेत्रनिरूपणोपक्रमः १०५

५० एतस्य भागत्रयस्य अग्र-मध्य-मूलात्मकशूलावयवाश्रयतया विभागनिरूपणे पार्श्वशृङ्गद्वयवर्तनाऽभिधानम् १०६–११०

५१ ततोऽर्धेन्दुद्वयकोटी यावद् दैर्घ्यादष्टादशाङ्गुलं मध्यशृङ्गवर्तनाभिधानम् १११–११२

५२ अत्रैव वैपुल्यनिरूपणे चतुर्भ्योऽङ्गुलेभ्यो यथायथं निम्न-मध्यभाग-पूर्वापराणां परिकल्पनविधानम् ११३

५३ अरोपरि पद्मत्रयवर्तनानिरूपणम् ११४–१२२

५४ अस्या व्याप्तौ पुरा प्रोक्तस्य अनुसरणोपदेशः १२३

५५ अनाहतपदव्याप्तौ अरात्रयस्य प्रवेश-निर्गम-भ्रमाकारत्वं कुण्डलिनीप्रबोधव्याप्तौ इच्छादीनाम् अरारूपत्वम् १२४–१२५

५६ जन्माधाराद् द्वादशान्तम् उदये शक्तित्रयप्रवेशविधिनिरूपणम् १२६–१२८

५७ तत्र पूजनात् सर्वसिद्ध्युदयः, समस्ताध्व-मन्त्रचक्र-व्याप्त्या षट्त्रिंशत्तत्त्वरूपत्रिशूलपरिभावनोपदेशः १२९–१३०

५८ मन्त्राणां मण्डले विषुवत्स्थतया प्राणसाम्येन विन्यासात् सर्वेश्वरपदभागित्वम् १३१

५९ ततः स्वस्तिकमण्डलनिरूपणम्. तत्र चतुर्दिक्षु त्रिंशत्-त्रिंशत्सूत्रस्थापनेन दिग्भागानां प्रत्येकश एकोनत्रिंशत्त्वम्, समस्ततया एकचत्वारिंशदुत्तराष्टशतत्वम् १३२–१३३

६० पद्मे-न्दुमण्डल-पीठ-वीथी-द्वाराणां यथास्वं पञ्च-द्वि-षड-ऽष्टा-

ऽष्टपरिमाणत्वात् स्वस्तिकस्य एकोनत्रिंशद्भागत्वं
सर्वकामप्रदत्वञ्च १३४-१३५
६१ तत्र चतुर्दिक्षु द्वारकोणेषु च वह्न्यादिभागानां क्रमेण लोपन-
विधानात् प्रथमं द्वारवर्तनानिरूपणम् १३६-१३७
६२ द्वारलग्नब्रह्मवंशस्य वामदक्षिणपार्श्वयोः एकैकभागपरिहारेण
भागानां लोपनात् पुरीसंज्ञवीथीवर्तनाभिधानम् १३८–१३९
६३ पूर्ववद् भागलोपनाच्चतुर्दिक्षु स्वस्तिकासुमेर्वोः अवस्थानस्य
द्वासप्तत्यधिकशतद्वयात्मनि नेत्रद्वयात्मके वीथीक्षेत्रे लोपनया
स्वस्तिकापुर्याख्यवीथीवर्तनायाश्च अभिधानम् १४०–१४२
६४ ब्रह्मवंशमध्यात् कर्णिकादेशादारभ्य पीठसंलग्नचन्द्रमण्डलपर्यन्तं
भागानां लोपनेन पद्मवर्तनाभिधानम् १४३–१४४
६५ दिक्षु पीठकोणेषु च उद्दिष्टभागानां लोपनविधानात्
स्वस्तिकसिद्ध्या पीठवर्तनाभिधानम् १४५–१४६
६६ अत्रैव रजःपातनिरूपणं तत्र पीठगतस्वस्तिकायाः चतुर्वर्णत्वं
वीथीगतायाश्च विद्रुमसंकाशत्वम् १४७–१४९
६७ तत्रैव वज्रादिशूलान्तास्त्राणां तदुपरि पद्म-चक्रा-ऽराणां
स्वरूपनिरूपणम् १५०–१५३
६८ अरामध्यस्य देवमंदिरत्वं सर्वकामफलप्रदत्वञ्च १५४
६९ श्रीसिद्धातन्त्रोक्तशूलाब्जविधिनिरूपणोपक्रमे त्रिहस्तक्षेत्रस्य
त्रिधाविभजनात् हास्तिकनवभागात्मकत्वं तत्र मध्ये
त्रिशूलविधानम् १५५
७० मध्यभागस्य त्रिधा विभागे नवभागस्य अर्धहस्तपर्यन्तनयनेन
शृङ्गत्रयसिद्धिः तदधः हास्तिकपद्माभिधानम् १५६–१६०
७१ दैर्घ्य-वैपुल्यनिरूपणाभ्यां दण्डवर्तनाप्रकाराभिधानम् १६१–१६२
७२ शूलाधो मध्यपद्मप्रतिष्ठापनोपदेशः १६३
७३ मण्डलविधिनिरूपणोपसंहारः

द्वात्रिंशमाह्निकम्

१ गुर्वागमोक्तमुद्राविधिनिरूपणप्रतिज्ञा
२ बिम्बोदितत्वाद् बिम्बोपायत्वाच्च मुद्रायाः प्रतिबिम्बरूपत्वे
श्रीमद्देव्यायामलप्रामाण्यम् १–२
३ देहद्वारेण स्वरूपार्पणस्य मुद्राशब्दे यौगिकार्थत्वम् ३

४ तत्र निष्फल-सकलभेदेन खेचरीमुद्रायाः प्रधानत्वं त्रिशूलिन्यादिनवभेदानां तदङ्गत्वम् ४–५
५ मालिनीमतोक्तानां तदङ्गभूतपद्मादिमुद्राणां बहुत्वाद् अमुख्यत्वाच्चात्र अनभिधानम् ६
६ देवीसांनिध्यकारित्वात् खेचर्याः प्राधान्यम् ७
७ पद्मादीनां काम्यकर्मविषयकत्वात् मोक्षेऽनुपयोगित्वाद् अत्रानभिधानम् ८
८ मुद्रायाः काय-कर-वाक्-चित्तभेदतः चतुर्विधत्वं तत्र पूर्णरूपेण खेचर्या एव निरूपणोपक्रमः ९
९ तत्र श्रीपूर्वशास्त्रप्रामाण्याद् योगिनः बिन्दु-नाद-ब्रह्मरन्ध्रलक्षणे खत्रये मनो निरुध्य शक्ति-व्यापिनी-समनात्मखत्रयावष्टम्भेन खेचरीत्वम् १०–११
१० श्रीयोगसंचारप्रामाण्यात् नाद-बिन्दु-शक्त्यात्मखत्रययोगिनि चित्ते शक्त्यात्मकखत्रयभेदनाद् योगिनः परशिवगामित्वम् १२
११ एतदनुवेधेन त्रिशूलप्रयोगाद् देहाद्यहन्तापहस्तनेन परबोधाकाश-चारित्वमिति त्रिशूलिन्या अपि स्वरूपनिरूपणम् १३–१५
१२ मध्यमप्राणे प्राणापानयोः दण्डाकारतया समरसनात् त्रिशूलत्वबोधेन व्योमोत्पतनम् १६–१७
१३ खेचरीमुद्राबन्धाविष्टस्य योगिनः तत्रैव एकदण्डत्रिशूलस्यापि समरसीकरणात् खेचरीचक्रसंजुष्टभैरवध्यानेन सद्य एव मेदिनीत्यागः १८–१९
१४ अनया योगिनः निरंशत्वम् आचारोत्तीर्णत्वं शंकोत्तीर्णत्वं नाहमिति भावनया सर्वदेवतामयात्मबोधसिद्धिश्च २०–२३
१५ शिवस्य सर्वमयत्वे शङ्कानवकाशाच्छङ्किनः सिद्धिवन्ध्यत्वम् २४–२५
१६ करङ्किणीमुद्राबन्धनविधिनिरूपणम्, तत्र श्रीयोगसंचार-प्रामाण्यात् स्व-परदेहयोः परस्परं गमाऽऽगमाभ्यां खचारित्वरूप-त्रैलोक्यसिद्धिनिरूपणम् २६–३१
१७ श्रीवीरावल्युक्तखेचरीमुद्राविधिनिरूपणे कुलकुण्डलिकाया ऊर्ध्वाधः प्राणसञ्चारमनादृत्य प्राणापानाभ्यां वज्र-लिङ्ग-मूलाद्याख्यतत्तदाधारादिभेदनेन मध्यधामाक्रमणम् ३२–३८
१८ मध्यधाम्नः परसंविद्विकासाधायिस्थानत्वज्ञानेन अस्य सृष्टिसंहारकारित्वसिद्धिः ३९
१९ व्युत्क्रमे योन्याधारतया प्रथितायाः खेचर्याः शूलमूलेतिपदव्यप-देश्यत्वं तत्र अवर्णे बाह्यामर्शानां लयगामित्वम् ४०–४१

२० श्रीमद्वीरावलिप्रोक्ते खेचरीप्रबोधविधौ खेचरीमुद्राविष्ट-ज्ञानिनाम् अन्तः बहिरुन्मेषनिमेषाभ्याम् आजवञ्जवीभावेन सृष्टिसंहारकारित्वोदयः ४२–४६
२१ श्रीकामिकोक्तखेचरीस्वरूपनिरूपणं तत्र अनच्ककलात्मना वक्त्रेण प्राणापानमध्यधाम्नि प्रमातृतत्त्वैकसाक्षात्कारेण खचारित्वोदयः ४७–४८
२२ कुलगह्वरे मोचन-द्रावणाभ्यां शक्तीनां मुद्रात्वम्, आसां खेचर्याः मुख्यत्वम्, वाचिकी-कायिकीत्वेन अस्याः द्वैविध्यम् ४९–५०
२३ भवाऽभवस्थानयोः संचारादस्याः मानसीत्वम् ५१
२४ मातृव्यूहे खेचर्याः पद्माष्टमुद्रापरिवारत्वम् ५२
२५ क्षकाराकृतिशरीराया अस्याः भैरवमहामुद्रारूपत्वम् ५३
२६ संकोचा-व्योमा-हृदया-शान्ता-शक्तिमुद्रा-पञ्चकुण्डलिनी-संहारमुद्रा-वीरभैरवेतिभेदैरस्याः अष्टधात्वे श्रीभर्गाष्टकशिखाकुल-प्रामाण्यम् ५४–६२
२७ एवं भेदेन अभेदेन वा स्थितया खेचर्या आविष्टस्य पराबीजत्वप्राप्तिः ६३
२८ सृष्टिबीज-खेचर्योश्च सकलमन्त्र-मुद्रानुप्राणकत्वम् ६४
२९ अतः खेचर्यावेश एव सर्वमुद्राणां तत्त्वम् ६५
३० मुद्राबन्धोपयोगार्थं कालभेदनिरूपणम् ६६
३१ मुद्राबन्धात् क्रमेण बोधावेशादिचक्रोदयदीप्त्यन्तफलानामुदयः ६७
३२ सुगूढमुद्राविध्युपसंहारः

त्रयस्त्रिंशमाह्निकम्

१ चक्राणाम् एकीकारनिगदनप्रतिज्ञा
२ चक्रभेदानाम् एकीकारदिङ्निर्णयः १
३ श्रीसिद्धावीरप्रामाण्यात् षडरे विश्वादिदेवीनां निरूपणम् २
४ चतुर्विंशत्यरे अघोर्यष्टक-मातृकाचतुष्टय-माहेश्यादिद्वादशक-सम्मेलनया देवीनिरूपणम् ३–५
५ षोडशारे षोडशश्रीकण्ठशक्तीनां सिद्ध्यादीनाम् उल्लेखः ६–७
६ षडरे बल्यादीनाम्, द्वादशारे दक्षादीनां शक्तिमतां परिगणनम् ८–९
७ षोडशारे श्रीकण्ठादीनां शक्तिमत्तया श्रीयोगाच्छक्तितया अवस्थानम् १०–१२
८ चतुर्विंशत्यरे संवर्तादिशर्मान्तिशक्तिमताम् अवस्थानम् १३–१४

९ चतुस्त्रिंशदरे जयादिकोपान्तानां शक्तिमत्तया स्त्रीलिङ्गे पाठात् शक्तितया अवस्थानम् १५–१६
१० चक्रभेदानुरोधेन मन्त्रविभागाभिधानम् १७–१८
११ उक्तक्रमानुरोधेन चक्रान्तरकल्पनविधानम् १९
१२ एकस्यैव चित्प्रकाशस्य विभागात् शक्तिमतः शब्दराशित्वं मालिन्याश्च शक्तित्वम् २०–२१
१३ शक्तिशक्तिमतोः वस्तुतः त्रिकत्वेऽपि अन्तःपरामर्शभेदात् चक्राराणां षट्का-ऽष्टक-द्वादशक-षोडशका-ऽसंख्यत्वम् २२–२४
१४ एवमंशांशिकापरामर्शात् स्वर-व्यञ्जनानां पञ्चाशत्त्वम्, अर्धमात्रोदयाद् एकाशीतित्वम् २५–२६
१५ स्वरस्यार्धमात्रासहत्वे पाणिनिप्रामाण्यम् २७
१६ चक्राणां संविदभिन्नत्वं स्वाम्यावरणभेदेन तस्य बहुधात्वम् २८–२९
१७ स्वामिभेदनिरूपणे सृष्ट्यादीनां परापरादिरूपत्वं तुर्यायाश्च मातृसद्भावत्वं विश्रान्तिपदव्यपदेश्यत्वञ्च ३०
१८ तुर्यस्य वक्त्रस्थप्रकाशत्वम्, तत्रैव विश्रमणविधानम् ३१
१९ अत्र विश्रान्त्या स्वात्मतन्मयीभूतविश्वस्य भानम्, गुरूदितैकीकारोपसंहारश्च ३२

चतुस्त्रिंशमाह्निकम्

१ क्रमगतस्वस्वरूपप्रवेशनिरूपणप्रतिज्ञा
२ आणव-शाक्त-शाम्भवोपायानां तारतम्यक्रमात् स्वरूपस्फुटनम् १–२
३ एवं सति अनुपायक्रमेण नित्यमस्य अन्तःकृतविश्वस्वात्मावेशः ३
४ स्वस्वरूपप्रवेशोपसंहारः

पंचत्रिंशमाह्निकम्

१ समस्तशास्त्रमेलननिरूपणप्रतिज्ञा सर्वव्यवहारनिबन्धनभूत-प्रसिद्धेरागमत्वञ्च १
२ अन्वयव्यतिरेकोपजीवित्वादनुमानस्य प्रसिद्धिनिबन्धनत्वम् २
३ प्रत्यक्षस्यापि प्रसिद्धिनिबन्धनत्वम् ३

४	अहर्जातबालप्रवृत्तेरपि स्वावमर्शात्मकप्रसिद्धिनिबन्धनत्वम्	४
५	तत्र अर्थविशेषगतस्य प्राग्वासनारूपविमर्शपरिकल्पितस्य चेतःप्रसादस्यापि अन्वयव्यतिरेकभागित्वम्	५–७
६	चेतःप्रसादस्य प्राग्वासनानुरोधित्वम्	८
७	प्राग्वासना एव पौर्वकालिकी प्रसिद्धिः	९
८	सर्वत्र व्यवहारे प्रसिद्धेरेव प्रामाण्यम्	१०
९	पूर्वपूर्वप्रसिद्ध्युपजीवनमार्गणात् प्रसिद्धेः सर्वज्ञपूर्वकत्वं नासर्वज्ञपूर्वकत्वम्	११–१२
१०	बहुसर्वज्ञपूर्वत्वे मानाऽभावाद् एकस्य सर्वज्ञपरमेश्वरस्यैव लोकव्यवहारनिबन्धनत्वम्	१३–१४
११	परम्परा-शास्त्राश्रयभेदेन पारमेश्वरप्रसिद्धेर्द्वैविध्यम्	१५
१२	शैवागमपरिग्रहे सर्वव्यवहारनिबन्धनत्वस्य नैमित्त्यम्	१६
१३	आगमान्तराणाम् अपूर्णत्वात् प्रतिनियतफलोपजीवित्वम्	१७
१४	विवेकिनोऽपि व्यवहारस्य प्रसिद्धिमात्रनिबन्धनत्वे निमित्तान्तरस्य अन्याय्यत्वम्	१८
१५	प्रसिद्धेश्च अविगीतस्वावमर्शात्मकप्रतीतिरूपत्वम्	१९
१६	तस्याश्च प्रमातृस्वभावत्वं प्रमातुः शिवरूपत्वात् सर्ववित्त्वम्	२०
१७	आशिवतासादनं स्वात्मानुसारिणीषु परिमितासु प्रसिद्धिषु अस्य शङ्कानवकाशः	२१
१८	भाविशिवत्वानुरोधात् शैवीप्रसिद्धिपरिग्रहोपपत्तिः	२२
१९	शैवीं प्रसिद्धिं प्रति बहुमाने विभोः प्रवृत्तौ निवृत्तौ च आगमैककर्तृत्वस्य हेतुत्वम्	२३
२०	धर्मादिश्चतुर्वर्गस्य प्रतिशास्त्रं वैचित्र्ये शाम्भवागमोपायत्वम्	२४
२१	शंभुकर्तृत्वेऽप्यस्य विषयभेदाद् भिन्नफलप्रदायित्वाद् विचित्रोपायोपदेशे विरोधपरिहारः	२५
२२	सर्वस्यैव लौकिकसांख्यादिशास्त्रस्य सद्योजातादिभेदतः शम्भुवक्त्र-समुद्भूतत्वे श्रीस्वच्छन्दादिप्रामाण्यम्	२६–२७
२३	आश्रमभेदात् संस्कारभेद इति वेदोक्तवर्त्मनैव अत्र लिङ्गोद्-धारादिसंस्कारान्तरोपपत्तिः	२८
२४	पूर्वाश्रमे उत्तराश्रमफलाऽप्राप्तिवत् शिवोदितत्वेऽपि पाञ्चरात्रादीनां न शिवतोदयफलत्वम्	२९
२५	शैवागमस्यैव सर्वशास्त्रविश्रान्तिपदत्वम्	३०
२६	एवंभूतागमोपेयस्य त्रिक-कुलपदद्वयव्यपदेश्यत्वम्	३१
२७	त्रिकस्य सर्वशास्त्रानुप्राणकत्वम्	३२

२८ श्रीमत्कालीकुलप्रामाण्याद् दशाष्टादशतन्त्राणां सारभूतस्य कुलस्य सर्वशास्त्रान्तःप्रतिष्ठानम् ३३–३४
२९ एवं तादृक्प्रसिद्धिरूपशिवागमस्य एकत्वेऽपि स्व-परादिरूपाधिकारिभेदात् वैचित्र्योपपत्तिः ३५
३० एवं स्वच्छन्दशासनप्रामाण्यात् शिवोद्भूतत्वात् सांख्यादीनां निन्दानिषेधः ३६
३१ खण्डशो व्यपोद्धारात् स्वकर्तृत्वमिथ्याभिमानात् तेषां सांख्यादीनां शैवतयाऽप्रसिद्धिः ३७
३२ अनेकागमपक्षेऽपि तेषां प्रामाण्यस्य विषयभेदाधीनत्वम् ३८
३३ नित्यत्वाविसंवादयोः न प्रामाण्यकारणत्वम् ३९
३४ तयोः प्रामाण्यकारणत्वाभ्युपगमेऽपि तथाभावोपदेशात् शैवस्यैव प्रामाण्यम्, अन्यथा व्याकरणे अतिप्रसङ्गस्य सर्वागमबाधकत्वप्रसक्तिः ४०
३५ अतएव अस्मदुक्तशास्त्रनिष्ठायाः अवश्यम् अङ्गीकरणीयत्वम् ४१
३६ फलसिद्धौ मुख्योपकारकतया शैवागमे एव महेशस्य प्रयत्नपरतोपदेशः एवविधाऽधिकारिणः दौर्लभ्यञ्च ४२–४३
३७ श्रीशंभुनाथोपदिष्टशास्त्रमेलनोपसंहारः ४४

षट्त्रिंशमाह्निकम्

१ श्रीसिद्धादिनिर्दिष्टस्य गुरुनिरूपितस्य च शास्त्रायातिक्रमस्य निरूपणप्रतिज्ञा १
२ श्रीसिद्धादिनिर्दिष्टक्रमनिरूपणं तत्र नवकोटिविस्तृतशास्त्रस्य कोट्यपकर्षतः भैरवादिगुर्वन्तनवभिः क्रमशोऽध्ययनम् २
३ तेषु गुरुतः कोटिमात्रस्य पादपादांशशः गुरुशिष्यक्रमाद् दक्षादेः प्रभृति रामान्तं प्राप्तस्य शास्त्रस्य एकोनविंशतिविभागत्वम् ३–६
४ वक्ष्यमाणपादादिभेदतः प्रतिखण्डञ्चात्र अष्टखण्डत्वम् ७
५ पादाद्यष्टखण्डानां नाम्ना निरूपणम् ८
६ तत्र देवीत्रयस्य त्रिधा अवस्थानेऽपि नवमे पदे गणनानर्हत्वात् नवखण्डत्वानभिधानम् ९
७ रामात् लक्ष्मणादिमाध्यमेन नरान्तम् आयातिकथनम् १०
८ गुरुनिरूपितायातिक्रमाभिधानं तत्र त्र्यम्बकादिसिद्धत्रयाणाम् अद्वयादिसम्प्रदायभेदेन आविर्भावकथनम् ११–१२

९ त्र्यम्बकदुहितृक्रमाद् अर्धत्र्यम्बकमठिकान्तर्भावनेन मठिकानां चतुष्टयत्वं संततिक्रमात् शतशाखत्वञ्च १३–१४
१० तन्त्रालोकस्य अध्युष्टसमस्तसंततिस्रोतःसारभूतरसरूपत्वम् १५
११ आयातिक्रमोपसंहारः उपादेयभावोपक्रमश्च

सप्तत्रिंशमाह्निकम्

१ प्रसिद्ध्युपजीविन आगमस्य अवश्यग्राह्यत्वम् १
२ लौकिकवस्तुवच्छिवेऽपि प्रसिद्धिनिबन्धनैव सिद्धिः २
३ महाफलस्य शास्त्रस्य उपादेयतमत्वम् ३
४ तत्र भैरवतापत्त्या कर्मस्थितिसंरक्षणम् ४
५ लोकसंग्रहार्थम् आर्षे पातहेतुतया प्रोक्तानामत्र वामशासने आशुसिद्धिप्रदत्वम् ५
६ सर्वज्ञदृष्टत्वाद् अधराधरादुत्तरपर्यन्तम् अशेषोपदेशेन तस्य अनुत्तरफलप्रसवित्वम् ६–७
७ अधरशासनानाम् असर्वज्ञप्रणीतत्वं लोकरक्षणकारणात् मायात्वञ्च ८–९
८ श्रीमदानन्दादिशास्त्रसंवादाद् आर्षवाक्यस्य प्रामाण्यनिषेधः शैवागमाश्रयणविधानञ्च १०
९ तत्र लोकरक्षणार्थं प्रोक्तस्य पाशहेतोः सद्यःसिद्धिकरत्वम् ११
१० भैरवतापत्त्या अत्र कर्मस्थितिप्रणाशापत्तिपरिहारः १२
११ अज्ञत्वानुपदेष्टृत्वविपर्ययस्य शिवशासनस्य अवश्यग्राह्यतायां नैमित्यम् १३
१२ श्रीकण्ठ-लकुलेशेत्याप्तद्वयतया शिवशासनस्य द्विप्रवाहात्मकत्वम् १४
१३ तयोः श्रीकण्ठस्य भुक्तिप्रदत्वं पञ्चस्रोतोमयत्वञ्च १५–१६
१४ स्रोतःपंचकस्य दशाष्टादशधात्वं भैरवागमस्य तु चतुःषष्टिविभेदित्वम् १७
१५ श्रीमदानन्दादिप्रामाण्यादत्रैव मन्त्र-विद्या-मुद्रा-मण्डलभेदात् पीठचतुष्टयात्मकत्वम् १८
